No. १३५२
क

Title कुमारी पूजा

Author

Extent ६ पत्र Age

Subject तन्त्र

कुमारीपूजा

नं. १३५२

कु० पू० १

ॐ श्रीगणेशाय नमः अथ कुमारीपूजा सर्वयज्ञोत्तमं भ्र
एकुमारीपूजनं अष्टाङ्ग कृते यस्मिन् महालक्ष्मीः चिरेण प्र
सीदति कन्यालक्षणं एकवर्षात्तु कन्याया पूजार्थे ता विव
र्जयेत् गन्धपुष्पफलादीनां प्रीतिस्तस्य न विद्यते जात्यन्धा
केकरां काणां कुरूपां तनुरोमजां संत्यजेद्रोगिणीं कन्यां
दासीगर्भसमुद्भवां अरोगिणीं सुपुष्टाङ्गीं स्वरूपां व्रणव
र्जितां एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् विप्रा

सर्वेष्टसंसिद्ध्यैयशसेक्षत्रियोद्भवां वैश्यांतुधनलाभा
यशूद्रांसुखोद्भवांयजेत् दारुणेचांत्यजातीनां पूजयेद्धि यां
धिनानरः द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात् पू
जयेत्सर्वकार्येषुयथाविधिक्रमागतः द्विवर्षासाकुमा
र्प्रोक्तात्रिमूर्तिर्हायनत्रिका चतुर्हान्तुकल्याणीपंचव
र्षातुरोहिणी षट्वर्षातुभवेत्कालीसप्तवर्षातुचंडि
का अष्टवर्षाशांभवीतुदुर्गास्यान्नवहायिनी सुभद्राद

कु॰
पू॰
२

ष्ठावर्षीक्तानामभिः परिकीर्त्तिताः अतऊर्द्ध्वं न पूज्या तुः
स्वदारिद्र्यनाशाय शत्रूणां नाशनायच आयुष्यबलवृ
द्ध्यर्थं कुमारीं पूजयेन्नरः आयुःकामस्त्रिमूर्त्तिं तु त्रिवर्गस्य
फलाप्तये अपमृत्युव्याधिपीडाद्यैः स्वानामयनं तये
सौख्यधान्यधनारोग्यपुत्रपौत्रादिवृद्धये कल्याणीं पू
जयेद्धीमान्नित्यं कल्याणवृद्धये आरोग्यस्वत्वकामीच
जयकामीतथैवच यशःकामीनरोनित्यं रोहिणीं परि

पूजयेत् विद्यार्थीचजयार्थीचराज्यार्थीचविशेषतः
शत्रूणांचविनाशार्थंकालिकांपूजयेत्सदा ऐश्वर्यय
शःकामीचस्वर्गकामीचयोनरः संग्रामेजयकांक्षीचचं
डिकांपरिपूजयेत् दुःस्वप्नादिविनाशायस्तंभसंमोहनाय
च महापापविनाशायधूम्रावतीपरिपूजयेत् नामेवचो
च्चाटनंशत्रूणामुग्रसाधनकर्मणि दुर्गादुर्गविनाशायपूज
येद्यत्नतोबुधः सौभाग्यधनधान्यादिवांछितार्थफला

कु॰
पू॰
२

3

मध्ये सुभद्रां पूजयेन्मर्त्यो दासीदाससमृद्धये अथ
पूजा आमंत्रयेत् पूर्वदिने कुमारीमंत्रपूर्वकं आवाह
येत् ततः कन्यामंत्रेणानेन भार्गव मंत्राक्षरमयीं लक्ष्मीं
मातृणां रूपधारिणीं नवदुर्गात्मिकां साक्षात् कन्यामा
वाहयाम्यहं कुमारिकादिकन्यानां पूजामंत्रं ब्रुवेऽधुना
जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि पूजां गृहाण
कौमारि जगन्मातर्नमोस्तु ते १ त्रिपुरां त्रिगुणाधारां त्रिव

र्णांज्ञानरूपिणीं त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्य
हं २ कलात्मिकां कलातीतां करुणाहृदयां शिवां कल्या
णजननीं नित्यां कल्याणीं पूजयाम्यहं ३ अणिमादिगु
णाधारां मकाराद्यक्षरात्मिकां अनंतशक्तिकां लक्ष्मीं रो
हिणीं पूजयाम्यहं ४ कामाचारां शुभां शांतां कालचक्र
स्वरूपिणीं कामदां करुणोदारां कालिकां पूजयाम्यहं
५ चंडवीरां चंडमायां चंडमुंडप्रभंजनीं पूजयामि म

कु॰ पू॰ ४

दुर्गा

ह्लादेवीं चंडिकां चंडविक्रमां ६ महानंदकरीं शांतां स
र्वदेवनमस्कृतां सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूज
याम्यहं ७ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं संतो
षजननीं देवीं सुभद्रां पूजयाम्यहं ८ पूजयामि सदा भ
क्त्या दुर्गां दुर्गार्तिहारिणीं सुंदरीं स्वर्णवर्णांगीं सुखदां सौ
भाग्यदायिनीं संतोषजननीं देवीं सुभद्रां पूजयाम्यहं ९
मंडले चरणौ तस्य क्षालयेद्दुग्धवारिणा अर्चयेद्धेमपा

ङ्गेणवारिपुष्पाद्यैःसमं सुवितानेशुभेस्थानेपंकजो
परिपीठके उपवेश्यकुमारींतांस्वांगेन्यासंसमाचरेत्
आत्मानंविधिवत्सज्यक्रोधदर्पविवर्जितः अथध्यायेत्
कुमारींतांमहालक्ष्मीस्वरूपिणीं मातुलुंगगदांखेटंपा
त्रंपीयूषपूरितं दधानाथःकराग्रहस्तेबिभ्रतींसर्वमंगलां
स्तनभ्रेहेमसर्वांगींमायामायस्तपूजितां नवाक्षरेणमंत्रे
णास्यसिद्धेनसमर्चयेत् दद्यादाचमनंतस्यैदद्याद्धस्तंस

कु॰ पू॰ ५ कंचुकं सकंकणांगुलीयानिकर्णालंकरणशुभे ग्रैवेय
कंप्रदत्वाथचंदनेनविलेपयेत् पूजयेत्पुष्पमालाभि
र्दिव्यैर्धूपैःसुधूपयेत् कुर्यादारात्रिकांराजन्हृदयांवाचतां
5 मुद्गः भोजयेद्भक्तिभावेनपायसंशर्करायुतं सुपक्वान्ना
६ निचान्यानिस्वादुवृन्तञ्चफलादिकं यावत्साभोजनंकुर्या
त्तावन्मौनंजपेत्सुधीः दद्यादाचमनंतस्यैताम्बूलंचसमर्प
येत् स्वनर्द्धेणचदानेनकुमारींप्रणमेत्सकृत् प्रदक्षिण

नमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः विसर्जयेत्कुमा
रीं तां स्वगृहे हर्षनिर्भरः अनेन विधिना भक्त्या कुमारीपू
जयाप्नुयात् यं यं प्रार्थयते कामं देवानामपि दुर्लभं ब्रह्म
विष्णुमहेशानां कुमारी परमा कुला तत्पूजनेन राजेन्द्र त्रै
लोक्यं स्यात्सुपूजितं तस्मात्पूजयध्वं भूपाल कुमारीं यत
मानसः स्वराज्यं प्राप्स्यसे दिव्यं मा ते भूदत्र संशयः इति कु
मारीपूजा

6